MSS No. 141 Subject Language

Name of MSS वृत्तरत्नाकर सेतिका

Author हरिभास्कर

Period — — Folios 027 (001 to 027)

Script Sanskrit Source Prithipal Singh

Missing Folios

वृत्तरत्नाकरसतिका ॥ हरिभास्करकृत १३ श्रावन (वदि) १८३६ वि॰ लिपित
२८ पत्रक ॥ ल॰ म॰ १५ पं॰ प्र॰ पृ॰

ह॰ ल॰

१५४

कमलं

ओं श्रीगणेशाय नमः ॥ प्रस्फुरन्मधुपचुंबितपद्मा पंकजातजनिपंकजिनीयं बुध्यते किल

वृ. र. टी. १ जगदपि चयस्मात्तारुणं तदिह धाम नमामः १ श्रीगुरून् स्मितरोचापि नत्वा भास्करशर्म्मणा

वृत्तरत्नाकरे सेतुर्यथामति विरच्यते २ ग्रंथारंभे यमधिकृत्य प्रवर्त्तते तत्प्रयोजनमिति गो

नमस्तत्रोक्तेः सप्रयोजनं शिवप्रणामरूपं मंगलं निबध्नन् ग्रंथस्य संबंधप्रयोजने श्लोकत्र

येणाह सुखसंतानेति सर्वं निर्विघ्नग्रंथसमाप्तिजन्यचिंतामणिरीत्या विघ्नध्वंसजन्यं वात

ओं श्रीगणेशाय नमः सुखसंतानसिद्ध्यर्थं नत्वा ब्रह्माच्युतार्चितं गौरीविनायकोपेतं

शंकरं लोकशंकरं १ वेदार्थशैवशास्त्रज्ञः पव्वेकोऽभूद्द्विजोत्तमः तस्य पुत्रोऽस्ति केदारः

शिवपादार्चने रतः २ तेनेदं क्रियते छंदोलक्ष्मलक्षणसंयुतं वृत्तरत्नाकरं नाम बाला

नां सुखसिद्धये ॥ ३ ॥

सुसंतानः परंपरा तत्सिद्ध्यर्थं शंकरं नत्वेति संबंधः एवं च सुखं ब्रह्मानंदः संतानं पुत्रपौत्रादि

तयोः सिद्धिरिति सत्लक्षणव्याख्यानं प्रकृतानुपयोगादुपेक्ष्यं अत्र श्लोके यमकालंकारः ॥ १

वेदार्थेति शंकरशब्दस्यावृत्तिः श्रुतेः ॥ यदुक्तम् अर्थे सत्यर्थभिन्नानां शब्दानां सा पुनः श्रुतिर्यमकमि

ति वेदार्थश्चाशैवशास्त्राणि [illegible] इति विग्रहः ॥ २ ॥ लक्ष्मेति

लक्ष्यं च लक्षणं चेति द्वंद्वः ताभ्यां संयुतं संयुक्तम् यन्मते लक्ष्यलक्षणयोरभिन्नत्वा
दत्रैकं द्वौ न युक्तौ इति सुधायामुक्तं तत्र पदार्थयोरभेदेपि पदार्थतावच्छेदकभेदेन द्वं
द्वस्य प्रमाणप्रमेय इत्यादौ बहुशो दर्शनात् यद्वा लक्ष्यं च तल्लक्षणं चेति कर्मधारयो
त्र ईदृशं वृत्तरत्नाकरं नाम छंदः छंदःप्रतिपादको ग्रंथः क्रियते इत्यर्थः ॥३॥ अथास्य

पिंगलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा मात्रावर्णविभेदेन छंदस्तदिह क
थ्यते ॥४॥ षडध्यायनिवद्धस्य छंदसोऽस्य परिस्फुटं प्रमाणमपि विज्ञेयं षट्त्रिंश
दधिकं शतम् ॥५॥ रामराम

कृतेरप्रामाण्यं निरस्यति पिंगलादिभिरिति पिंगलः सूत्रकारः आदिना भाष्यकारा
दयः लौकिकमिति तेन चात्र वैदिकस्यात्राधिकार इति भावः अत्र हलायुधव्याख्याकारः
छंदस्त्रिविधं गणमात्रावर्णभेदात् तत्राद्यमार्यादि द्वितीयं वैतालीयादि तृतीयं गा
यत्र्यादीत्याह तन्न गणछंदसो मात्राछंदस्येवांतर्भावादित्याशयेनाह ॥ द्विधेति मात्रा
छंद आर्यादि वर्णछंदः श्रीप्रभृति एतेन मात्राछंदो गणछंद इति द्विधा विभागोपि निराकृ
तः ॥४॥ शतमिति ग्रंथगणनायां प्रसिद्धानामनुष्टुप्छंदःसंख्याकानामिति शेषः एतेनास्य

अथ द्वितीयाद्यध्यायगतवक्ष्यमाणलक्षणोपजीव्याः संज्ञा उद्दिशति म्यरस्तेत्यादिना।
वृ.र. म्.य्.र्.स्.त्.ज्.भ्.न्.ग्.ल्. इति दशैता एकाक्षराः संज्ञाः धीः श्रीः स्त्रीमित्यादि सूत्रा
टी. न्यासात् अकारोच्चारणं तु क्वचिन्मयरसतजभनलगसंमितिमित्यादाविव सुखमुखो
॥२॥ च्चारणार्थमिति भावः ॥ आसां संज्ञानामीदृशक्रमे बीजं तु पश्चैव वक्ष्यामः। समस्तमिति सं
हितप्राकृताद्यात्मकमित्यर्थः त्रैलोक्यमिति सर्वं विष्णुमयं जगदित्युक्तेः ॥१॥ अथैतासां संज्ञा
नामभिधेयमाह सर्वगुरिति सर्वे त्रयो गवा गुरवो यस्मिन्स मो मसंज्ञः। मुखमादिर्लो लघु
यस्मिन्नंतौ चैवौ गुरू स यः मध्यो लघुराद्यंतौ गुरू यस्य स रः अंत्यो गुरुराद्यौ च लघू यस्य स

म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः। समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥१॥
सर्वगुर्मो मुखान्तर्लो यरावन्तगलौ सतौ। मध्याद्यौ ज्भौ त्रिलो नोऽष्टौ भवन्त्यत्र गणास्त्रिकाः ॥२॥

सः अंत्यो लघुराद्यौ गुरू यस्य स तः मध्यो गुरू राद्यंतौ लघू यस्य स जः आद्यो गुरुरंतौ लघू य
स्य स भः त्रिलघुर्नः इत्यष्टौ त्रिकास्त्र्यवयवा यदिमात्रामेषां ते त्रिकास्त्रिवर्णात्मका २
ज.१५। इति यावत् गणा भवंति। म.ऽऽऽ य.।ऽऽ र.ऽ।ऽ स.।।ऽ त.ऽऽ। भ.ऽ।। न.।।। यद्यपि सूत्रे
कृतायांदिषु वक्ष्यमाणानां च गुर्भीज्ञानामेव लः समुद्रागणाः इति द्वितीयाद्यध्यायगत
सूत्रेषु गणसंज्ञाः कृताः धीः श्रीः स्त्रीमित्यादि स्त्वगनमकारं चतसृज्ञात्वेनेत्यादि रुक्तिं ग्रंथ

स्यादेवमेव स्वारस्यं तथापि मादीनां वर्णसमुदायरूपत्वाद्गणत्वेन व्यवहारः अत एवात्रा
ष्टु. नेजितिस्त्रेण जगणः कर्त्तव्य इति वृत्तिकारः। तथापि लिपितो गणतोपि चेति
भामहोपीति दिक्। अत्रेदमवधेयम् दुष्टास्ते जायस्मात्कृतादीनां विनाशकाः काव्यादौ न दा य
तव्या इति छंदोविदो जगुः। यदा दैववशाद्दोषगणो दुष्टफलो भवेत्। तदा तद्दोषशांत्यर्थं
शोध्यः स्यादपरो गणः। तद्यथा मनौ मित्रे भयौ भृत्यावुदासीनौ जतौ स्मृतौ। रसावरी नीचसंज्ञौ
द्वौ द्वावेतौ मनीषिभिः। मित्रोदासीनभृत्येभ्यो मित्रभृत्यौ शुभौ मतौ। अन्येभ्यो इतरे नेष्टा इत्यर्थ

ज्ञेयाः सर्वांतमध्यादिगुरवोऽत्र चतुष्कलाः। गणाश्चतुर्लघूपेताः पंचार्यादिषु संस्थिताः ८
ह्यपरिशोधतः। गणत्वसंज्ञा ह्यर्णानामपि शुद्धिः प्रकाश्यते। अ.इ.उ.ऋ जाष्ठठढणास्यफवाभमरल
बौ ह लाः संयुताश्चान्ये काव्यादौ न शुभा मताः। अत एवोक्तम् अ[illegible]द्दोषपरिशुद्धेतु नायं नियम कौ
स्तीति सर्वस्यैतस्यापवादो भामहेनोक्तः देवतावाचकाः शब्दाः ये च भद्रादिवाचकाः। ते स
र्वे च न निंद्याः स्युर्लिपितो गणतोपि चेति॥७॥ अथ द्वितीयाध्यायगतार्यादिलक्षणोपजीव्या
नां पंचगणानां स्वरूपमाह। ज्ञेया इति सर्वश्चांतश्च मध्यश्चादिश्च सर्वांतमध्यादयः। ते गुरवो
येषु ते तथोक्ताः द्वंद्वे निरूप्यमाणत्वाद्गुरुपदस्य प्रत्येकमन्वयः तेन सर्वगुरुर्मध्यगुरुरादिगुरु
[illegible]तादृः १

श्चेति चत्वारो गणाः। ननु तर्हि मसजभरूपा एवैत इति पुनः कथनं व्यर्थं वैतेषामत आह। चतुःकला
वृ. र. इति। चतुर्मात्रा एतेन [illegible]गणस्य का मसजभा तेन सर्वगुरोर्द्विगुरोरित्यर्थः। एकस्य गुरोर्द्विमात्रत्वा
॥ ३॥ त्। एवमंते गुरौ आदौ लघू मध्यगुरौ वाद्यंतयोरादिगुरावं तावेव द्वैयौ अन्यथा चतुर्मात्रतानस्या
टी. त्। एवं चत्वारो गणास्तत्कं पंचमं गणमाह। चतुर्लघ्विति चत्वारो लघवो यस्मिन्नस्य चतुर्लघुः पं
चमो गणस्तेन सहिताः पंचगणाः यथा द्विगुरुः ऽऽ अंत॥ऽ मध्य।ऽ। आदिगुरुः ऽ॥ चतुर्लघुरि
ति॥॥ एषामुपयोग आर्यादिलक्षणे द्वितीयाध्याये भविष्यति। यत्तु सर्वादौ व्याख्यातं सर्वत्रां
ते मध्ये आदौ च गुरुर्येषां ते इति तच्चिंत्यं सर्वोबहुव्रीहिरिति पाणिनिसूत्रस्येन शेषपदेन त्रिक
योर्हि शेषग्रहणमित्यादि महाभाष्यवार्तिकादिग्रंथेन सह विरोधात्। अत एव चित्रगुरित्यत्र
चित्राणां गवामयमिति मीमांसकोक्तो विग्रहोऽपि न श्रेयः। अत्र सर्वैंते आदिश्चेत्यादिग्रंथेन कर्म
धारयं कुर्वतः [illegible]णस्य तत्महान्प्रमादः सर्वगुरुगणस्यानुपपत्तेः किंच आद्यंतपदयोर्व्यत्यय
श्चेन्मात्राप्रस्तारक्रमविरोधादिति षष्ठे स्फुटीकरिष्यते॥५॥ अथ गुरुलघुस्वरूपमाह। सानु ॥ ३॥
स्वार इति। यथा नरूणां सर्पेत्यादावनुस्वारांतो णो गुरुः। श्रियः पतिरित्यादौ विसर्गांतो

यो गुरुः परः संयोगपरो यथा तरुणं सर्षपेत्यत्र सकाराकारः। अकारो व्यंजनानां तोपिपठ्यमानत्वभुवां मनमपविभ्रंशाऽ भवदितियत्र माहुः गुरुपर इति व्यंजनोपध्मानीयजिह्वामूलीयपराणाम् उपलक्षणमिति व्याचख्युस्तत्र व्यंजनांशे उपलक्षणत्वमास्तां जिह्वामूलीयादौ शेतु संयोगपरत्वे वनास्तीति कथं तदिति चिंत्यं। अयोगवाहानां शार्ङ्गरूपसंख्यानत्वाज्जिह्वामूलीयोपध्मानीययो र्हलत्वेन कवर्गपवर्गयोरानंतर्य्येणासंयुक्तत्वात्। यथोक्तं हयवरट् सूत्रे महाभाष्ये ३६ जकः ह लोऽनंतराः संयोग इति संयोगसंज्ञेति। सानुस्वारो गुरुर्यथा गोवलीवर्दन्यायेन एवं विसर्गस्यापि

सानुस्वारो विसर्गी तो दीर्घो गुरुः परश्चयः वा पादांते त्वसौ गवक्रो ज्ञेयोऽन्यो मात्रिको लघुः

इति छंदोमम्। एवं ह्रस्वस्य गुरुत्वमुक्तं दीर्घश्च गुरुः तरुणं सर्षपशाकमित्यत्रैव शाकारात्परश्चा कारः॥ वा पादांत इति पादस्य ह्रस्वो ग्राह्यस्तदंतस्य लघोर्गुरुत्वं वैकल्पिकं तेन गुरुत्वाज्जेतो स वंशस्थत्वं दीरितं जगविति वंशस्थलक्षणं। जगन्निवासो वसुदेवसद्मनि इत्यत्र संगतं भवति अन्यथा सद्मनीति इकारस्य लघुत्वेन भगणांतत्वं स्यात्। केचित्तु लघुत्वेनैव तेन जौ समानिकागलौ चेत्यादौ समानिकादिलक्षणसमन्वयः॥ विषमपादांत जलधोस्तव तुरस्वा

गुंजित १

रादिपरत्वं विनानगुरुत्वं। अत एव सप्तमे काव्यप्रकाशकृता क्रमः विकसितसहकारभा
वृ० र० रहारिपरिमलगुंजितैर्द्विरेफ इति। अत्र परिमलपदं त्यक्त्वा पूर्ववर्णस्य गुरुत्वार्थं प्रत्युदितत इ
॥ ९ ॥ तिपाठो युक्त इति। कवयस्तु विषमपादान्तस्यापि गुरोः स्थाने लघु प्रयुंजते यथा दिवाकराद्रक्ष
ति यो गुहासु इत्यादि अथ गुरोः प्रस्तारे लेखनसंप्रदायमाह। वक्र इति यथाऽन्यो गुरोरन्यो मा
त्रिकोल लघुर्ज्ञेयः मतल्लजैर्लेख्यो यथा॥ २॥ अथ गुरोरपि क्वचिल्लघुतामाह। पादादाविति
पादादौ यः संयोगः स क्रमसंज्ञकः तस्मिन्परतः पूर्वस्य गुरोरपि वर्णस्य लघुता स्यात् अत्रस्येति
पादादाविह वर्णस्य संयोगः क्रमसंज्ञकः पुरः स्थितेन तेन स्याल्लघुतापि क्वचिद्गुरोः॥ १०॥ इदमस्या
दाहरणं॥ तरुणं सर्षपशाकं नवौदनं पिच्छिलानि च दधीनि अल्पव्ययेन सुन्दरि ग्राम्यजनो मि-
लघुत्वस्येत्यर्थः॥ तरुणमिति अत्राल्पव्ययेन सुन्दरि इति तृतीयपादान्त इकारो ग्राम्येति सं
योगपरत्वाद्गुरुरित्यार्याया यास्तृतीयपादस्य षोडश मात्रा उक्ता न प्रकल्प्यत इत्यतस्तस्य लघुत्व
मुच्यते यदुक्तं श्रुतबोधे यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेपि। अष्टादश द्विती
ये चतुर्थके पंचदश सार्येति। वस्तुतस्तु सनादिग्रंथपर्यालोचनेन आर्यायाः पादद्व

वस्यानलभ्यते अतएवपादादाविह वर्णस्येतिपाठः। क्वचित्पुस्तकेषूपलभ्यते एकत्रायं
कुत्स्यंविसंयुक्तस्यपरोवर्णोलघुर्हाइ इति प्राकृतपैंगलेसामान्यतः कुत्रापीत्यभिधानात्
प्राप्तनाभिहृदमज्जनमाशुप्रस्थितंनिवसनग्रहणायेतिमाघादौनामीतिकारस्यह्रेतिसं
योगपरस्यापिलघुतायाऔचित्याच्च अन्यथास्वागतानांगितिसत्रासंगतेरितिदिक्।
सरस्वतीकंठाभरणकारस्तुयदातीव्रप्रयत्नेनसंयोगादेरगौरवंनछंदोभंगमस्याहुस्तदादोषा
श्रेध्यिमंतरसादीनांज्ञेयाः संज्ञास्तुलोकतः ज्ञेयः पाद अतुर्थांशोयतिर्विछेदसंज्ञिता १२
युक्समंविषमंचायुक्स्थानंसद्भिर्निगद्यते। समसंद्धसमंवृत्तंविषमंचतथापरं १३ अंघ्रयो
यस्यचत्वारस्तुल्यलक्षणसंयुताः तच्छंदःशास्त्रतत्वज्ञाःसमंवृत्तंप्रचक्षते १४ प्रथमां
घ्रिसदृशंयस्येत्याह। एतेनछंदोभंगभीत्यापूर्वोक्तेमाघश्लोकेहृदशब्दमपनीयनदशब्दःपठनीयइति
ऽपास्तं त्रिकारोत्तमनादेयम् ११ अध्यीति। अर्थोर्थोनुगुणीभवत्यातमित्यादौव्यवहृततानामिति
शेषः चतुर्थांश इतिश्लोकस्येतिशेषः। आर्यादिषुवक्ष्यमाणयायतेःस्वरूपमाह। विछेदेति
यथावक्ष्यतिषष्ठेद्वितीयलादित्यादि। संज्ञांतरमाह युक्समिति। युगितिसमपादस्यसंज्ञाय

यावक्ष्यत्यनुष्टुप्प्रकरणे युजोर्जेन सरिद्भर्तुरित्यादि। अयुक्कुगिति विषमपादस्य संज्ञा यथा
वृ. र. तेनैव वक्ष्यति चपलावक्त्रमयुजोरित्यादि। चकारात्समपर्यायो युग्मशब्दो विषमपर्याय ओ
टी. जशब्दश्च ज्ञेयः यथा वक्ष्यति वैतालीयप्रकरणे पदा समावोजयुग्मकावित्यादि। सममिति
॥ ५ ॥ तृतीयेध्यायेवक्ष्यति गुः श्रीरित्यादि। अर्द्धसममिति यथा चतुर्थेवक्ष्यति विषमे यदि सौ सौ ल
गाइत्यादि अत्र द्रुतमध्यादीति महोक्तव्याख्यानं चिंत्यं उपचित्रस्य त्यागिवीजाभावात्। विष

घ्रिसमो यस्य तृतीयश्चरणो भवेत्। द्वितीयस्तुर्यवद्वृत्तं तदर्द्धसममुच्यते ॥१५॥ यस्य पादच
तुष्केपि लक्ष्म भिन्नं परस्परं। तदाहुर्विषमं वृत्तं छंदःशास्त्रविशारदाः ॥१६॥ आरभ्यैकाक्षरा
त्पादादेकैकाक्षरवर्द्धितैः। पृथक्छंदो भवेत्पादैर्यावत्षड्विंशतिं गतं ॥१७॥ तदूर्ध्वं चंडवृ
ष्ट्यादिदंडकाः परिकीर्तिताः। शेषं गाथास्त्रिभिः षड्भिश्चरणैश्चोपलक्षिताः ॥१८॥ उक्तौत्यु

मं चेति यथा पंचमे वक्ष्यति अक्षरप्रदोषभिरित्यादि। एषां त्रयाणां स्वरूपं श्लोकत्रयेणाह। प्र
थघ्रि यो यस्येत्यादिना यस्य चत्वारः पादास्तुल्यास्तत्समं यस्य प्रथमतृतीययोर्द्वितीयच ५
तुर्थयोश्च पादयोः साम्यं तदर्द्धसमं। यस्य चत्वारोपि पादा विलक्षणास्तद्विषममित्यर्थः। ॥

आरभ्येति एकाक्षरमारभ्य षड्विंशत्यंतमेकाक्षरवृद्धितैः पादैः सामंत दंडकाः समं। यस्य चत्वारो
पि पादा विलक्षणास्तद्विषममित्यर्थः समं वृत्तं त्रीण्युपाध्यायैश्चत्वकं दृष्टव्यम्‌ तदूर्ध्वमिति
षड्विंशत्यूर्ध्वं चंडवृष्ट्यादीनि। अत्रादिनाव्याल जीमूतादय इति स्वधोक्तिः श्विंत्यात्मणोरेव
योस्त्यागस्य निर्बीजत्वात्‌। शेषमिति। तत स्त्रिभिः षड्भिश्चरणैरुपलक्षितानां गाथानां प्रक

क्ता तथा मध्या प्रतिष्ठान्या सुपूर्विका गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च २१
त्रिष्टुप् च जगती चैव तथातिजगती मता। शक्वरी सातिपूर्वा स्यादष्ट्यत्यष्टी ततः स्मृते।
धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः। विकृतिः संकृतिश्चैव तथाभिकृतिरुत्कृ
तिः २१॥ इत्युक्ताः छंदसां संज्ञा क्रमशो वच्मि सांप्रतं लक्षणं सर्ववृत्तानां मात्रावृत्तानुपू
र्वकम्‌ २२ इति श्रीभट्टकेदारविरचिते वृत्तरत्नाकराख्ये छंदसि संज्ञाभिधानः प्रथमोध्यायः १

रणरूपं शेषमित्यर्थः एकाक्षरादि षड्विंशत्यंतानां छंदसां क्रमेण संज्ञा श्लोकत्रयेणाह। उक्ते
त्यादिना द्वितीयं मात्रावृत्तमुक्तो सर्ववृत्तानां लक्षणं सांप्रतं त्रीण्यादौ वच्मि वक्ष्यामि वर्त
मानसामीप्ये वर्तमानवत्प्रत्ययः॥२२॥ इति वृत्तरत्नाकरटीकायां प्रथमः अध्यायः॥ समाप्त

ज्ञेयं सर्वं

अथ श्लोकेन

अथ पद्यद्वयेनार्यां लक्षयति लक्ष्मैतदित्यादिना। यत्र चतुर्मात्रा गणाः सप्त भवंति एकेन गुरुणाष्ट-
दे. १ मस्थानीयेन सहितास्तेन दार्यायाः प्रथमेऽर्द्धे नियतं लक्षणं सप्तगणा नामष्टाविंशतिमात्राः
ढ पं ।। अष्टमस्थानीये गुरौ सत्यष्टमात्रे इति संयोजनात्त्रिंशतिमात्राः वैशिष्ट्यमार्यायाः प्रथमार्द्धे लक्षणं
दी. पर्यवसितं। तत्किं विशेषेणेत्याह भवतीति इह प्रथमार्द्धे विषमे विषमस्थाने प्रथमतृती-
यपंचमसप्तमाख्ये गणे द्विगुर्वादिवन्मध्यगुरुरूपचतुर्मात्रत्वात्प्राप्तोपि यो जगणो न जै
भवति समे त्वनियमः क्व तर्हि नियतः स्यादत आह। षष्ठ इति षष्ठं प्रगणः षष्ठो वाप्र

लक्ष्मैतत्सप्तगणा गोपेता भवति नेह विषमे जः षष्ठोऽयं नलघू वा प्रथमेऽर्द्धे नियत-
लघुश्च ५ मार्यायाः ॥१॥ ततततन

यद्वा षष्ठोऽयं न[illegible]लघू देयौ नश्च नलघू नगणो द्विलघुरेक इतरो लघुश्चेति चतुर्लघुरूपो गणः
षष्ठो देय इति यावत् तथा च जगणश्चतुर्लघुर्वान्यतर एव षष्ठ इति नियमः फलितः यथात्रैव ल-
क्षणे समन्वयः लक्ष्मेति द्विगुरुरूपश्चतुर्मात्र एको गणः [illegible] एवं तत्स इति द्वितीयः प्रग- इ
त्न णः इत्यंत्यगुरुस्तृतीयः गोपे इति गुरुरूपश्चतुर्थः ताभव इत्यादिगुरुः पंचमः तिनेहे इति मध्यगुरुः
[illegible] षष्ठः विषमे इत्यंतगुरुः सप्तम इति सप्तगणानामष्टाविंशतिमात्राः जः इति चा

स्वराणां

तेगुरुतितस्यद्विमात्रे इति संयोजनात्त्रिंशन्मात्राः संतिप्रथमार्द्धे नास्तिचविषमस्थाने जगणः षष्ठस्त
ऽस्त्वेवतिनेहेति। नचव्यंजनं चार्द्धमात्रिकमित्युक्तेर्व्यंजनद्वयसंयोगस्यमात्रात्मकत्वाल्लेद्वेने इत्या
दौमात्राधिक्यात्त्रिंशन्मात्रारूपलक्षणासंगतिरितिवाच्यं। अत्रमात्राणामेवगणत्वेनव्यंजनसं
योगानामतथात्वात् नलघूवेत्यस्योदाहरणंतद्द्वितीयस्यपद्यप्रथमार्द्धे ज्ञेयम्। अत्रषष्ठोयमिति
षष्ठस्थानेजगण इति सुधीोक्तंव्याख्यानमनादेयं प्रथमायाः षष्ठ्यर्थेलक्षणापत्तेः। यत्तु नलघू

षष्ठेद्वितीयलात्परके लेमुखलाच्च सयतिपदनियमः चरमेर्द्धेपञ्चमके तस्मादिह
भवतिषष्ठोलः ॥२॥ स्वर्यायनमः॥

वेत्यत्रनगणयुक्तोलघुरितिसल्लक्षणमात्र तत्रैननलघू इति द्विवचनानुपपत्तेः। एवमार्यायाः पू
र्वार्द्धलक्षयित्वा द्वितीयेनपद्येनयतिनियमयुतार्द्धलक्षणंचाह॥ षष्ठेइति अत्रप्रथमेदलेपूर्ववर्त्त न
ते षष्ठस्थानेलेनगणयुक्तेलघौचतुर्लघाविति यावत् कृतेसतिचतुर्लघुसंबंधीयोद्वितीयोलघुस्त
स्मात्प्रथमे पूर्वस्मिन्प्रथमलघौसयतिसविच्छेदंपदस्यनियमः समाप्तिः। परकइति। सप्तमस्थाने
लेसतिमुखलादादिलघोः प्रथमेषष्ठगणांतेसविच्छेदंपदसमाप्तिरित्यर्थः यथात्रैवषष्ठेद्विती
यलात्परके लेमुखलाच्चेत्यत्रषष्ठचतुर्लघुप्रयुक्तोयतिः सयतीत्यत्रात्रसप्तमलघुप्रयुक्ता।

अथोत्तरार्द्धे यतिनियममाह । चरमे इति अंतिमेऽर्द्धे पंचमस्थाने ले सति तस्य प्रथमलघोः पूर्वस्मिन्
चतुर्थगणांते यतिः यथा चरमेऽर्द्धे पंचमे तस्मादित्यस्यांते अथोत्तरार्द्धे लक्षणमाह । इह भवती
ति आर्योत्तरार्द्धे षष्ठगणस्थाने ... एको लघुरेव देयो न तु चतुर्मात्रागणः शेषं पूर्ववद्भव
ति । एवं हि पंचगणानां विंशतिर्मात्राः षष्ठगणस्थानीयलघोरेकस्य सप्तमगणस्य चतस्रः अष्ट
मस्थानीयगुरोर्द्वे इति संयोजनात् सप्तविंशतिर्मात्राः वेदितव्याः आर्योत्तरार्द्धे लक्षणं पथ्यं वसनं
अस्ति चेदं चरमे इत्याद्युत्तरार्द्धे षष्ठो य इत्यादि पूर्वपद्योत्तरार्द्धे चेति स्वयं संगमनीयं ।
त्रिष्वंशकेषु पादो दलयोराद्येषु दृश्यते यस्याः पथ्येति नाम तस्याः छंदोविद्भिः समाख्यातम् २
उल्लंघ्य गणत्रयमादिमं शकलयोर्द्वयोर्भवति पादः । यस्यास्तां पिंगलनागो विपुलामिति
४ उभयार्द्धयोर्जकारौ द्वितीयतुर्यौ गमध्यगौ यस्याः चपलेति नाम तस्याः प्रकीर्तितं नाग
राजेन ॥ ५ ॥ आद्यं दलं समस्तं भजेत लक्ष्म चपलागतं यस्याः शेषे पूर्वं जलक्ष्मा मुखचपलासोदिता मुनिना ॥ ६ ॥ भेदा आर्यादिवत्रैष्टुभपांसः संति यद्यपि तथा
प्यनुपयुक्तत्वान्नवुवे किल तानि हि । इत्यार्यालक्षणम् । अथ पथ्यार्यालक्षणमाह त्रिष्विति यस्या
द्वयोरप्यर्द्धयोस्त्रिष्वंशकेषु चतुर्मात्रागणेषु पादो विरामो दृश्यते सा पथ्येति केवलं यतिकृ
तनामधेयातोस्यां वेलक्षण्यं त्रिष्वंशकेषु पादो इत्यस्यांते यतिः पूर्वार्द्धे पथ्येति नाम तस्या इत्यत्रोत्तरा

गुर्वोर्मध्यगतो जगणो यस्या द्वयोरप्यर्द्धयोर्द्वितीयचतुर्थौ स्यातां सा चपला आर्या यथा पूर्वार्द्धे द्वयो
र्जे इति द्वितीयो जगणः द्वितीय इति चतुर्थोपि एवमुत्तरार्द्धे तिनामेति द्वितीयो जगणः प्रकीर्त्ति
त इति चतुर्थोप्यत्र प्रथमं मुखचपलालक्षणमाह ॥२॥ आद्यमिति यस्या आद्यमर्द्धं चपलालक्षण
विशिष्टं यातशेषं पूर्वं जलक्ष्मा आर्योत्तरार्द्धे सामान्यलक्षणेन सप्तविंशतिमात्रारूपेण विशिष्टा सा
मुखचपला अन्वर्था चेयं संज्ञा मुखे पूर्वार्द्धे चपलालक्षणवत्वात् ॥ एवमुत्तरार्द्धे चपलालक्षणव
त्वाज्जघनचपलाया आपि अन्वर्थत्वमेवाह ॥ प्राग्गिति प्रथमेर्द्धे आर्यापूर्वार्द्धलक्षणं प्रथमेतरे द्वितीये च

प्राक्प्रतिपादितमर्द्धे प्रथमे प्रथमेतरे तं चपलायाः लक्ष्माश्रयेत सोक्ता विशुद्धधीभिर्जघनच
पला ॥७॥ आर्याप्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः । दलयोः कृतयतिशोभां तां गी
तिं गीतवान्भुजंगेशः ॥८॥ श्रीसूर्याय नमः ॥

पलालक्षणं सा जघनचपला प्रथममितरद्यस्मादिति बहुव्रीहिः इत्यार्याप्रकरणम् अथ गीतिः
आर्याप्रथमेति ॥ यस्याः पूर्वार्द्धवद्द्वितीयार्द्धेपि लक्ष्मैतदित्यादि पूर्वार्द्धलक्षणं भवेत्तां पिंगलो गीतिमु
क्तवान् ॥ कथमपीति पूर्वोक्तषष्ठोयं न लघुर्वेति पक्षयोरन्यतरपक्षेणापीत्यर्थः ॥ पक्षद्वया
यां षष्ठे जगणश्चतुर्लघुगणान्यतमप्रकारेणेति व्याख्यातं तद ऽ ऽ कृ । षष्ठ जगणचतुर्लघुरूप

वृ.टी. योर्द्वयोरेकस्यैव निर्द्धारणीयत्वात् अन्यतमशब्दो हि बहुविषयकनिर्द्धारणे प्रयुज्यते। यदुक्तं कैयटे
॥ ६ ॥ न। अन्यतरान्यतमशब्दावव्युत्पन्नौ स्वभावाद् बहुविषये निर्द्धारणे वर्त्तेते इति। अथोपगीतिः आ
र. र्याद्वितीयेति। इह भवति षष्ठो ल इत्यार्योत्तरार्द्धलक्षणं यस्या द्वयोरप्यर्द्धयोः स्यात्सोपगीतिः अ
योद्गीतिः। आर्याशाकलमिति यस्या द्वितीयमर्द्धं पूर्वार्द्धलक्षणकं पूर्वार्द्धं तूत्तरार्द्धलक्षणकमिति व्य दण
त्ययेनार्द्धरचितं सोद्गीतिः। तद्वदिति॥ पथ्यार्यावदिति भावः। यत्यंशेनेति त्रिंशच्छकेष्वित्याद्युक्तांस
प्रकृत्यर्थः १०॥ अथार्यागीतिः आर्यापूर्वार्द्धमिति त्रिंशन्मात्रारूपं पूर्वार्द्धं निधने अन्ते एकेन॥

आर्याद्वितीयकेऽर्द्धे यद्गदितं लक्षणं तत्स्यात् यद्युभयोरर्द्धयोरुपगीतिं तां मुनिर्ब्रूते ८ आर्या
शाकलद्वितीयं व्यत्ययरचितं भवेद्यस्याः सोद्गीतिः किल कथिता तद्वद्यत्यंशभेदसंयुक्ता॥१०॥

गुरुणा युक्तं द्वात्रिंशन्मात्राविशिष्टपूर्वार्द्धमिति यावत् यदीयं स्यात् उत्तरार्द्धमपि निखिलं तद्वत् द्वात्रिं
शन्मात्राविशिष्टमित्यर्थः सार्यागीतिः तथा चोक्तं सूत्रकारेण अर्द्धे वसुगण आर्यागीतिः अत्र वसवे
ऽष्टौ इति वसुगणे इति च प्रथमाद्विवचनान्तमिति सुधादावुक्तम् तत्रा इदूदेद्द्विवचनमिति प्रगृह्यत्वा
त्प्रकृतिभावापत्त्यायादेशाद्यनापत्तेः तस्मादेतत्सूत्रमित्यन्ये त्विति केचिद्व्याख्यातं। अर्द्धे द्वे द्वितीये चा ॥ ६ ॥
षगणोऽसत्त्वार्यागीतिः। एतेन पूर्वार्द्धे द्वात्रिंशन्मात्रा उत्तरार्द्धे त्वेकोनत्रिंशन्मात्रा आर्यागीतौ भवन्ति

इतिमन्यमानाः सल्लदलगादयोपिनिराकृताः। मधुकरविटपानमिताग्ररूपंकीर्विभ्रतोस्यविटपा
नमिताः परिपाकपिशंगलताः रजसारोधस्यकास्तिकपिशंगलतेति माघोक्तार्यागीतिप्रत्युदाहृत दा
विरोधाच्च। इतिगीतिप्रकरणम्। अथवैतालीयम्। षड्विषमइति। वैतालीयेछंदसिविषमेपादेप्र
थमतृतीयरूपेषट्कलाः षट्मात्रादेयास्तासामंतेचरलौरश्चरलौमध्यलघुः रगणः अन्त्याल लक्ष्म
घुश्चततोगुरुश्च। अतिसमेपादेद्वितीयेचतुर्थरूपे अष्टौकलादेयाः तास्वनिरंतरानोस्युः नोइतिनि
षेधार्थः अव्यवहितालघवोनदेयाइत्यर्थः। तासामष्टकलामंतेविषमपादवत् रगणोलघुगुरू
आर्यापूर्वार्द्धेयदिगुरुरेकेनांध्रिकेननिधनेयुक्तं इतरंतद्वन्निखिलंभवतियदीयमुदिते
यमार्यागीतिः॥११॥ षड्विषमेष्टौसमेकलास्ताश्चसमेस्युर्नोनिरंतराः। नसमात्रपराश्रिता
कलावैतालीयेंतेरलौगुरुः १२
चर्षेयौ ०अत्रआसुषट्कलासुमध्येसमाकलाद्वितीयादिकापराश्रितातृतीयाद्याश्रिताकार्ते १
व्याद्वितीयतृतीयाभ्यामेकोगुरुर्नकर्तव्यइत्यर्थः एवंचतुर्थीपंचमीभ्यांषष्ठीसप्तमीभ्यांचतदिदंवैता
लीयलक्षणम् ०अस्तिचेदमत्रैवषड्विषमइतिप्रथमेविषमेपादेषण्मात्रास्तासामंतेष्टौसमेइतिरगणा
त्तदंतेचकलाइतिलघुगुरुनास्तिचद्वितीयातृतीयाभ्यांचतुर्थीपंचमीभ्यांचमात्राभ्यामेकोगुरुः
किंतर्हि प्रथमाद्वितीयाभ्यांपंचमीषष्ठीभ्यामस्ति एवंतृतीयपादेपादेपिद्रष्टव्यम् ०अथद्वितीयसमा

९ पादेतास्वसमेसु रित्यष्टौमात्राः संतितत्तदंते नोनिरमितिरगणास्तदंते तत्तराद्वत्तिलघुगुरुमात्राश्चयुक्ता।
छं०टी० अष्टौलघवो न संति किंतु गुरुभिश्रिताः नापिद्वितीयादिमात्रास्तृतीयादिभ्याभिश्रिताः संति एवं चतुर्थपादे
पूर्ववत् अथौपछंदसिकं पर्यंतमिति अवसाने विषमपादेषण्मात्रास्तदंते रगणयगणौ यत्र तदौपछंदसिकं
समपादेष्टौ मात्रास्तदंते रगणयगणौ यत्र तदौपछंदसिकम् तत्पूर्ववच्छेषमिति यद्यपि विषमपादेषु लघो
राम र्गुरुत्वमितिप्राग्युक्तं तथापि कविसमयप्रसिद्ध्यारसादिकाव्यविषयं तत्र त्वेतादृशाविषयमिति भावः आ
पातलिकेति विषमेषण्मात्रा समेष्टौ वैतालीयादिपूर्ववत् इयांस्तु विशेषः तासामंते भगणौ गुरुद्वयं चेति प्र
२ न्यादिति चकाराद्यत्र नांतस्यापि ह्रस्वस्य गुरुत्वाया प्रागुक्तत्वाद्बुध्यत्वेन द्रष्टव्या अपरदक्षिणांतिका तृती

पर्यंते र्यौ तथैव शेषं चौपछंदसिकं सुधीभिरुक्तं १३ आपातलिका कथितेयं भाद्गुरुकावथ पूर्व
वदन्यत् १४ तृतीययुग्दक्षिणांतिका समस्तपादेषु द्वितीयलः। १५ ॥०॥०॥ रामाय नमः।

येति युग्वैतालीयस्य चतुर्षु पादेषु द्वितीयो लघुना युक्तः स्यात्प्रथमो लघुर्द्वितीयो गुरुरेव स्यादिति याव
त्सादक्षिणांतिका १५ अथोदीच्यवृत्तिः ॥ उदीच्येति। यत्रायुग्मयोरेव पादयोः रगणयुक्तः श्चेत्तद्वि
तीयो लघुः स्यात् तद्वैतालीयमुदीच्यवृत्तिसंज्ञं स्यात् १६॥ अथ प्राच्यवृत्तिः। पूर्वेणेति। च
तुर्थेन युक्तः पंचमश्चेल्लघुः समपादयोः स्यात्तद्वैतालीयं प्राच्यवृत्तिः ॥१७॥ अथ प्रवृत्तकं पदे कौ
ति। एवं योरुदीच्यवृत्तिप्राच्यवृत्त्योः समौ सह द्वैतौ ओजयुग्मौ विषमसमपादौ विषमपाद
उदीच्यवृत्तेः समपादः प्राच्यवृत्तेरिति यथासंख्येनान्वयः क्रमश्चेदेशासामान्यादि ॥९॥

नितांतीयस्यायादिति भावः। तत्प्रवृत्तकं नाम अथापरांतिका अस्येति प्रवृत्तकस्य समपादैः प्राच्य
वृत्तिलक्षणैर्या सर्वपादेषु रचिता सापरांतिका॥ अथ चारुहासिनी अयुजमिति। या प्रवृत्तकस्य
विषमपादैरुदीच्यवृत्तिलक्षणैः रचिता सा चारुहासिनी। अथानुष्टुप्प्रकरणम्‌ वक्त्रमिति
अनुष्टुभ अर्णाद्वरे छंदसि आद्यात्तदक्षरादग्रेण नगणो न देयो नापि सगणः किंतु मगणादयो देयाः।

उदीच्यवृत्तिर्द्वितीयलः संयुक्तोऽग्रेण भवेदयुग्मयोः ॥१६॥ पूर्वेण युतोऽथ पंचमः प्राच्यवृत्तिरु
दितेति युग्मयोः ॥१७॥ यदा समौ वाऽयुजयुग्मकौ पूर्वयोर्भवति तत्प्रवृत्तकं ॥१८॥ अस्य युग्मर
चितापरांतिका ॥१९॥ अयुग्मपूर्वा चारुहासिनी ॥२०॥ इति वैतालीयप्रकरणम्‌ वक्त्रं ना
द्यान्नसौ स्यातामब्धेर्योऽनुष्टुभि ख्यातम्‌ ॥१॥

किंच अब्धेश्चतुर्थादक्षरादग्रे यो यगणो देयस्तदग्रे चान्य एको वर्णो देयः ईदृशमनुष्टुप्छंद
सि वक्त्रमित्युच्यते। यथा त्रैवं वक्ष्याद्यादक्षरादग्रे क्रमेणाद्या इति सर्वगुरुर्मगणोऽस्ति न तु नगण
सगणौ द्याः इति चतुर्थादक्षरादग्रे न सौ स्यातां स्य यगणः एवं द्वितीयेऽपि द्रष्टव्यम्॥ ॥

१० अथ वक्त्रस्य भेदानाह युजोरिति युग्मिति समपादस्य संज्ञोक्तमाद्ये युजोः समपादयोरिति वारिधेश्चतुर्थात्।
वृ० द्वतादगौजेन जगणस्य प्रयोगेण विषमपादयोर्यगणो न च पथ्यावक्त्रं प्रकीर्तितं अवशिष्टं वक्त्रवत् एवमग्रेपि
॥ ओजयोरिति विषमपादयोर्वारिधेश्चतुर्थाद्गेजेन जगणप्रयोगेण समपादयोर्यगणो च विपरीतपथ्यावक्त्रं ना-
टी० म चपलेति विषमपादयोश्चतुर्थाद्गेन नगणप्रयोगेण समपादयोर्यगणो न च चपलावक्त्रं नाम अथ युग्मविपुला
यस्यामिति समपादयोर्यस्यां सप्तमो लघुः स्याच्छेषं वक्त्रवत् सा युग्मविपुला नाम यद्यपीदं युजोरित्यादि
पथ्यावक्त्रे पतितत्वात् पुनरप्युपदेशे यत्नं वारत्वाद्दोषः एवं पिंगलमतेन विपुला अथ सैतवमुनिमतेनाह सैत-
वस्येति चतुर्ष्वपि यत्र सप्तमो लघुः सा विपुलेति सैतवस्य मतमित्यर्थः ये तु चतुर्थाज्जगणो नेव सैतव विपुला

युजोर्जेन सरिद्भर्तुः पथ्यावक्त्रं प्रकीर्तितं ओजयोर्जेन वारिधेस्तदेव विपरीतादि ३ चपलावक्त्र-
मयुजोर्नकारश्चेत्पयोराशेः ४ यस्यां लः सप्तमो युग्मे सा युग्मविपुला मता ५ सैतवस्याखिलेष्व-
पि ६ नोध्वितो मो विपुला ७
मे

नाहुस्तेषां नियमे किं मानमिति न विद्मः तस्मात्सा युग्मविपुला मतेत्यत्रैव न जभेनान्यतमेन गणो न चतुर्थ
मा... नियमे किंमाननिति न विद्मः तस्मात्सा युग्मविपुला मतेत्यत्रैव नजभेनान्यतमेन गणो न चतुर्थाच्चरे।
पादे युग्मसमे लघौ सति सैतववविपुलेति निर्णयः यथा मानकं लक्ष्यं स्यात्सप्तमो यत्र लघुः चतुर्ष्वपि च।
णाम्रु सा विपुलोक्ता मुनिमतिभिः सैतवस्य मतेन चेदृति अथ विपुला भेदानाह भेनेति चतुर्थ्याराष्ट्र चतु-
र्थाद्गणस्य प्रयोगेण न विलास्यात् अत्र एवेकेनेव चरणेयं लक्षिता यत्तु लक्षणेनोक्तम् विषमपादयोर्भगण-
प्रयोगेण न विपुलेत्तितन्न मौतौ चेति सामान्यतश्चतुर्था द्गणो न भविपुलायाः तत्र कारिका लक्षितत्वाद्वि-
समपादयोरित्यत्र मानाभावात् यदपि मौ नौ चेत्यत्र च चपलावक्त्रमयुजोर्नेति सत्यादयुग्मपादयोरेव
त्तेति इति वृत्तिकारेणोक्तम् तदपि न समर्थितः सैतवस्येति सत्त्वोक्तं विहितस्य सर्वपदस्यैवानुवर्तनेर्युक्तत्वाच्च १०
विपुला युग्लः सप्तमं इति ...न बहितपदानुवर्तिनीति स्यपकृतानुपितत्वाच्च ॥०॥०॥०॥० रामः

ध एतेन चपलावक्त्रमित्याद्युक्तवन्तं इति यत्सल्लक्षणेनोक्तं तदपास्तं। यदपि तेनोदाहृतं
ला विश्वं द्वीकामगजकुंभाभविपुलस्तनीत्यादि तदपि न। तस्यैतेतवोक्तविपुलालक्षणा
क्रांततयाभविपुलालक्ष्यत्वाभावात्। एवं हि वटेवटे वैश्रवणश्चत्वरेचत्वरे शिव इत्यादि महा
कविप्रयोगाणामपि नास्माकं प्रतिकूलाः। एवं रनतविपुलास्वपि ज्ञेयम्। इत्यमिति चतु
श्चरणेषु चतुर्थादक्षराद्द्गणप्रयोगश्चेत्तदान्यारविपुलास्यादित्यर्थः॥ नौवुघोरिति। च

इत्यं मन्यरश्चतुर्थात्॥८ नौवुघेश्चेन्नविपुला॥९॥ तौव्धेसात्सर्वान्याभवेत्॥१०॥

इत्यनुष्टुप्प्रकरणम्। द्विगुणितवसुलघुरचलधृतिरिति च॥११॥ ॥

ततुषु चतुर्थान्नगणश्चेत्तदा नविपुलानाम तोव्धेरिति चतुर्षु चतुर्थान्नगणप्रयोगश्चेत्तविपुलानाम। अत्रा
न्याग्रहणान्मयसगणैर्विपुलात्रयमनुक्तमपि ज्ञेयमिति प्राचः। सूत्रादावनुक्तत्वादप्रमाणमिति नव्याः। अथ
तेषामाशयः विशेषलक्षणैर्यदाक्रांतं लक्ष्यं तस्य तेन तेन नाम्ना व्यवहारः यत्तु नाक्रांतं तस्यानुष्टुविति सा न
मान्यजातिनाम्ना व्यवहार इति न लक्ष्यविरोध इति। इत्यनुष्टुप्प्रकरणम्। अथ धान्यानि मात्राछंदां
स्याह। द्विगुणेति वसवोऽष्टौ द्विगुणिताः वसवः षोडशेत्यर्थः। तत्संख्याका लघवो मात्रा यस्यां साऽचलधृतिर्ना ल
म। प्रत्येकं षोडशलघुपरिमिताश्चत्वारः पादा यस्यां भवंति एवमग्रेपि। पिंगलस्त्विमां गीत्यार्येत्याचष्टे। अ

पासामेदानाह। मात्रेति यत्र षोडशमात्रा छंदसि नवमी मात्रा ल लघुरेवं त्रिमो वर्णो गुरुरेव स्याच्छेषे त्वनियमः त
न्मात्रासमकं नाम। जो ल्वाविति। अंबुधेरष्टमात्रातो जगणः शेषं पूर्ववत् तदा विश्लोक इति नाम छंदः। अक्षिचे
ह अपांवु इति जगणः अयमपवा चतुर्मात्रातो लो नगणो लघुश्चायस्य स्यात्तस्यापि विश्लोक इति नाम। अ
स्मिन्पदे लक्षणा चेद्रचना त्वेवं जो ल्वावपाञ्जलधेर्विश्लोक इति नाम॥ लघुगलेति। अंबुधेर्युग्मगलाद्दशमा
त्रात इत्यर्थः। चेत्तुर्गणो नगणो लघू वा सा वानवासिका नाम। अक्षिचेह नवासीति जगणः ह्रस्वपदे तु वा
नवासिका जलधियुगात्स्यादिति लक्षणरचना। वाणेति पंचाष्टनवसु यदि लघुः स्यात्सा चित्रा नाम

मात्रासमकं नवमो ल्गांतं॥१२॥ जो ल्वावपांबुधेर्विश्लोकः॥१३॥ तद्युगलाद्वानवासिका स्यात्॥१४॥ वाणा
ष्टनवसु यदि लश्चित्रा॥१५॥ उपचित्रा नवमे परयुक्ते॥१६॥ अपराभ्योगस्ता उपचित्रा॥१७॥ यदती
तकृतविविधलक्ष्मयुतैर्मात्रासमादिपादैः कलितं अनियतवृत्तपरिमाणयुक्तं प्रथितं जगत्सु पादाकु
लकं॥१८॥

शेषं पूर्ववत् उपचित्रेति। नवमस्थाने गुरौ सति उपचित्रा नाम। इमामेवान्यमतेनाह। अपराभ्य इति अपरा
त्रातो गुरुलघुयुगलप्रयोगादुपचित्रेत्यर्थः। अथ पादाकुलकमाह। यदतीतेति उक्तैर्विविधलक्षणैर्मा
त्रासमकादिलक्षणैर्युता ये मात्रासमकादिपादास्तैः कलितं युक्तं पादचतुष्टयेपि अनियतवृत्तानामने
कवृत्तानां मात्रासमकविश्लोकवानवासिकाचित्रोपचित्राणां परिमाणेन युक्तं पादैराकुलितत्वात्पा
दाकुलकं नाम। जगत्सु प्रथितमित्यर्थः [illegible] मात्रासमकविश्लोकचित्राणां लक्षणं धि ॥

पद्या॥

अथ सर्ववृत्तलघुगुरुप्रमाणमाह। वृत्तस्येति वृत्तस्य ला मात्रा वर्णैर्विना वृत्तवर्णसंख्यया न्यूना या संख्या
तत्परिमिता गाः। गुरुसंख्या ज्ञेया। यथात्रैव प्रथमपादे वृत्तस्य ला विना वर्णैरिति चतुर्दशरूपमात्रासं
ख्या पादवर्णसंख्ययाऽष्टरूपया न्यूनीकृता षड्रूपा भवति तत्परिमिता गुरवः सन्ति षड् गुरवः इति या
वत्। एवं सर्ववृत्तपद्ये गद्ये च ज्ञेयं तथा गुरुभिर्विना गुरुसंख्याया अवशिष्टा वर्णाः लघुसंख्या ज्ञेयाः य
थात्रैवाष्टवर्णे पादे षड्गुरवः इति ज्ञाते तदन्यौ द्वौ लघू इति परिशेषाद् बुध्यते अथ वा लघुषु ज्ञातेषु परि
शेषाद् गुरवो ज्ञेया इत्याह। गुरवो लैरिति लघुभिर्विना लघुसंख्याया अवशिष्टाया मात्रासंख्याया दले

वृत्तस्य लाविना वर्णैर्गो वर्णा गुरुभिस्तथा। गुरवो लैर्दले नित्यं प्रमाणमिति निश्चितम्॥८॥
इति मात्रासमकप्रकरणम्। शिखिगुणितदशलघुरचितमपगतलघुयुगलमपरमिदम
ल खिलम्। सगुरुशकयुगलकमपि सुपरिघटितललितपदविततिभवति शिखा॥१॥ त ॥

अर्धे या संख्या तत्संख्याका गुरवो ज्ञेया इति गुरुलघुप्रमाणं निश्चितम्। यथात्रैव चतुर्दशमात्रासु दले
षड् इति ज्ञाते द्वित्वसंख्यातो ऽवशिष्टाया द्वादशसंख्याया अर्धे संख्या तत्परिमिता गुरवः इति। शिखी
ति शिखिभिस्त्रिभिर्गुणिता दश त्रिंशद्भवन्ति तत्संख्यैर्लघुभिः रचितम् अपगतलघुद्वयं यस्मिंस्तद
ष्टाविंशति लघुयुक्तमित्यर्थः। एवं पूर्वार्धे लघुसंख्योक्ता। अथ द्वितीयार्धे तामाह। अपरमिति। उत्तरा
र्धे त्वखिलं त्रिंशल्लघुयुक्तेन तु पूर्वार्धवर्णाविंशतिलघुकम्। अथोभयोरप्यर्धयोर्गुर्वन्त्यतामाह॥ सगुरु इति

वा॑ष्टौ तरार्द्धयोर्वैपरीत्येन खंजा भवतीत्याह । द्विनिमयेति । विपरीतार्द्धद्वयेन युक्ता पदरचना यादिरचि
वृ. र. टी. ता गुणनिचयो यत्र द्वयमपि कृत्योः सखकारिणी जिज कारे खजेत्य त्रजकारस्य शिरः प्रान्ते
॥ २२ ॥ रामुपगतिवतिसति या खजा सा खंजे भवति भवति लक्ष्यानुरोधादेव मया कं खंजेत्युच्यमाने छंदो
भंगः स्यात् यथोक्तं माघे । हिरण्यपूर्वं कशिपुं प्रचक्षते इति अष्टाविति छन्दस्ता द्विगुणितानाष्ट
ष्टौ दो उपा भवंति तत्र मिता यस्याः पूर्वार्द्धे गुरवः उत्तरार्द्धे तु द्वात्रिंशल्लघुयुक्तं सानंगक्रीडा नाम । चत्वा अ

विनिमयविनिहितशाकलयुगलकलितपदविततिविरचितगुणनिचयोभ्यक्तिसख
कोदिपमपिजगतिजिशिरउपगतवतिसतिहिभवतिखजा ॥ ४ ॥ अष्टाविंदंगाद्यभ
स्तायस्याः सानंगक्रीडोक्ता दलमपरमपि वसुगुणितसलिलनिधिलघुकरचित
पदविततिभवति ॥ ५ ॥ त्रिगुणनवलघुरवसितिगुरुरिति दलयुगकृतनतनुरतिरुचि
रा ॥ ६ ॥ इति श्रीभट्टकेदारविरचिते वृत्तरत्नाकरे द्वितीयोध्यायः ॥ २ ॥ ॥

रोप्यष्ट गुणिता द्वात्रिंशद्भवंति ॥ ५ ॥ त्रिगुणेति । त्रिगुणिता नव सप्तविंशतिस्ते लघवो यस्यां अवसितौ व
साने गुरुः स्यात् भो वेत्तिनः ईदृशार्द्धद्वयकृततनुर्यस्याः सातिरुचिर्नाम ॥ ६ ॥ इति श्रीमदग्निहोत्रि
कुलतिलकायमानश्रीमदायाजिभट्टसुतभास्करविरचिते वृत्तरत्नाकरसेतौ द्वितीयोध्यायः ॥ २२

द्वितीये मात्राछंदोभिधाय वर्णवृत्तानि विवक्षुस्तृतीये समवृत्तानि लक्षयन्नेकाक्षरजातिमभि
कुरुते। उक्तायामिति एकाक्षरपादे छंदसि इत्यर्थः गः श्रीरिति। यस्या एकगुरुरूपः पादः सा
श्रीनाम। यथा श्रीशः पायात्। यद्यपि समवृत्ताधिकारे गौ स्त्रीत्यादिवत् पादे नैव श्रीछंदो लक्ष
यितुमुचितं तथापि गः श्रीरिति तस्य पूर्णार्धमर्धपादानं। यत्तु सुधीदोलस्य लक्षणे पादे काक्षरेण पा
देनासंग्रहाद्द्वितीयक्रमिति व्याख्यातं तन्न। गः श्रीरित्येकाक्षरेणपादेनापि तयोः संग्रहीतुं शक्यत्वात्

उक्तायां। गः श्रीः। अत्युक्तायां गौ स्त्री। मध्यायां। मोनारी। रोमृगी। प्रतिष्ठायां। म्गौ चेत्कन्या
सुप्रतिष्ठायां भौगिति पंक्तिः॥ गायत्र्यां त्यौ चेत्तनुमध्या। शशिवदनान्यौ। त्सौ चेद्वसुमती॥
विद्युल्लेखा मो मः। उष्णिहि। मसौ गः स्यान्मदलेखा॥ अत्युक्तायां द्व्यक्षरे पादे। गाविति। यस्याः
पादे द्वौ गुरू सा स्त्री नाम। यथा श्रीमान् भानुः नित्यं सेव्यः। मध्यायां त्र्यक्षरे पादे। म इति यस्याः पादे म
गणः सा नारीनाम। नारीणां कल्याणीमां पायात्सा वाणी एवमग्रेपि स्वयमुदाहरणीयं। र इति। यत्र
रगणः सा मृगी नाम। प्रतिष्ठायां चतुरक्षरे पादे। म्गाविति यत्र मगण एको गुरुश्च सा कन्या नाम। सुप्रतिष्ठायां
पंचाक्षरे पादे। भौगिति भगणस्ततो द्वौ गुरू सा पंक्ति नाम॥ गायत्र्यां षडक्षरे पादे। त्याविति। यत्र तगणय
गणौ सा तनुमध्या नाम। शशीति यत्र नगणयगणौ सा शशिवदना नाम। त्साविति। यत्र तगणसगणौ सा व

यत्र

गुरुद्वये

कुमारेति। जगणरगणगुरुभिः गुरुकुमारललितानाम। सरग्गैरिति। सगणरगणगुरुभिर्हं
वृ.र. समालानाम अनुष्टुभि अष्टाक्षरे पादे। भाविति। भगणद्वयेन गुरुद्वयेन च चित्रपदानाम। मद्विति॥
टी मगणद्वयेन च विद्युन्मालानाम। माणवकमिति। भगणतगणलघुगुरुभिर्माणवकं नाम। म्नाविति
॥२३॥ ति मगणनगणगुरुद्वयैर्हंसरुतं नाम। जौविति रगणजगणगुरुलघुभिः समानिका नाम। अत्र
विषमपादांत्यवर्णस्य गुरुत्वेनेति कविसमयप्रसिद्धिर्नावतरति। प्रमाणिकेति। जगणरगणलघु
गुरुभिः प्रमाणिकानाम। वितानमिति। समानिकाप्रमाणिकाभ्यामन्यद्वितानं नाम। अत्र जगणतग

कुमारललिता ज्सौ ग्। सरौ गैर्हंसमाला। अनुष्टुभि भौ गिति चित्रपदा गः। मो मो गो गो विद्युन्मा
ला। माणवकं भात्तलगाः। म्नौ गो हंसरुतमेतत्। र्जौ समानिका गलौ च। प्रमाणिका जरौ लगौ च। वितान
माभ्यां यदन्यत्॥

णौ गुरुद्वयं चास्तीति ताभ्यां भिन्नमन्यपदेनात्र लक्षितं छंदो
ति रिक्तमनुष्टुब्वृत्तमित्यनेकविधिमत्युह्यं॥ यत्तु सल्लक्षणेन ज्योत्स्नावितानमेदं वं पयपत्रिये मनोरमामि।
त्यादि पद्यत्रयमुदाहृतं तदसंगतं चित्रपदालक्षणत्वात्। यदपि भट्टाः वयं तु गृह्णीमस्तेषां वितान
तेति ग्रंथेनैकौ गुरुर्द्वौ लघू पुनर्गुरू द्वित्रामेव पुनरिति क्रमविशिष्टस्याप्यनुष्टुप्छंदसो वितान
त्वं वदतां मुक्तो मरीचक्रुत्तदपि न तस्य माणवकलक्षणत्वात्। आभ्यामन्यदित्यस्योक्तलक्षण
त्रियमाभावोपलक्षणतया स्वयमपि व्याख्यातत्वेन पूर्वग्रंथविरोधाच्च॥ नमनमनम॥ ॥ २३

नाराचेति। नगणरगणलघुगुरुभिर्नाराचकं नाम। बृहत्यां नवाक्षरे पादे रादिति रगणनगणसगणै
र्हलमुखी नाम। त्रिभिः षड्भिश्च यतिरिति भुजगेति नगणद्वयेन मगणेन च भुजगशिशुभृता नाम।
ऽष्टभिर्द्वाभ्यां चात्र यतिः। पंक्तौ दशाक्षरे पादे। म्साविति मगणसगणजगणगुरुभिः शुद्धविराडि
ति नाम। म्नाविति मगणनगणजगणगुरुभिः पणवं नामेति प्राचः वस्तुतस्तु जगणस्थाने यगण
उचितः तथा च वृत्तरत्ने पणवो म्नौ य्गाविति। अत एव हिमकले पिङ्गले चिदेवं पाठः म्नौ य्गौ चेति पणवना
मेदमिति। ज्राविति रगणजगणरगणगुरुभिर्मयूरसारिणी नाम। भ्माविति। भगणमगणसगणगु

नाराचकं तरौ लगौ। बृहत्यां रान्नसाविह हलमुखी। भुजगशिशुभृता नौ मः। पंक्तौ। म्सौ ज्गौ शुद्ध
विराडिदं मतम्। म्नौ ज्गौ चेति पणवनामकम्। ज्रौ रगौ मयूरसारिणी स्यात्। भ्मौ सगयुक्तौ रुक्मवती
यम्। मत्ता ज्ञेया मभसगयुक्ता। नरजगैर्भवेन्मनोरमा। त्जौ जो गुरुणेयमुपस्थिता। त्रिष्टुभि स्यादिंद्र
वज्रा यदि तौ जगौ गः। उपेंद्रवज्रा जतजास्ततो गौ। अनंतरोदीरितलक्ष्मभाजौ। पादौ यदीयावुपजातयस्ताः। यदी
इत्थं किलान्यास्वपि मिश्रितासु स्मरंति जातिष्विदमेव नाम॥

रुभिः रुक्मवती नाम। म्तेति मगणभगणसगणगुरुभिर्मत्ता नाम। नरेति नगणरगणजगणगुरुभिर्मनोरमा
नाम। त्जाविति तगणेन जगणद्वयेन गुरुणा चोपस्थिता नाम। त्रिष्टुभि एकादशाक्षरे पादे। स्यादिति। तगणद्वयेन
जगणेन गुरुद्वयेन चेंद्रवज्रा नाम। उपेंद्रेति। जगणतगणजगणैर्गुरुद्वयेन चोपेंद्रवज्रा नाम। अनंतरेति इंद्रवज्रो
पेंद्रवज्रालक्षणसहितपादैर्युक्ता उपजातयो नाम। एवं प्रकारेणान्यास्विंद्रवंशादिमिश्रितासु जातिष्विदमेवो
पजातिरिति नाम स्मरंति प्रयोगवशात्। तत्र वंशस्थोपेंद्रवज्रामिश्रिता यथा वाल्मीकि रामायणे सुंदरकांडे नमो

दै २

इंद्रवज्रेंद्रवंशोपेंद्रवज्रावंशस्थमिश्रिताः यथा प्रबोधचंद्रोदयनाटके विद्याप्रबोधोदयजन्मभूमिर्वाराणसीमु
वृ॰ र॰ क्तिपुरीति त्यथा। अतः कुलोच्छेदविधिं विधित्सुर्निर्वस्तुमत्रेच्छति नित्यमेव सः। एवम् प्रयोगवशादन्यदपु
टी॰ दाहरणीयम् एतेन समस्तानां जातिमिश्रिणामुपजातित्वमिति द्वयोरेव जात्योर्मिश्रणे उपजातित्वमि
ति व्याचक्षाणानां प्राचां ग्रंथा अनादरणीयाः। इंद्रवज्रोपेंद्रवज्रामात्रलक्षणकपादोपजातिभेदसं
॥ १६ ॥ ख्यामाह एकत्रेति। तयोरिंद्रवज्रोपेंद्रवज्रयोरन्यतरो भेद एकस्मिन्पादे द्वयोस्त्रिषु वा स्यात्तदा चतुर्दशो
पजातयो भवंति। यथा उइंइंइं १ इंउइंइं २ उउइंइं ३ इंइंउइं ४ उइंउइं ५ इंउउइं ६ उउउइं ७ इंइंइंउ ८
उइंइंउ ९ इंउइंउ १० उउइंउ ११ इंइंउउ १२ उइंउउ १३ इंउउउ १४ । इति एतासां क्रमेण नामान्यपि प्रा
क्तेते पिंगलेऽभिहितानि। यथा कीर्तिर्वाणी माला साला हंसी माया जाया बाला आर्द्रा प्रेमा रामा रिद्धि

एकत्र पादे चरणद्वये वा पादत्रये वान्यतरः स्थितश्चेत्। तयोरिहान्यत्र तदोहनीयाश्चतुर्दशो
क्ता उपजातिभेदाः। नजजलगैर्गदिता सुमुखी। दोधकवृत्तमिदं भभभाद्गौ। शालिन्युक्ता म्तौ तगौ गो
ब्धि॰ तासु रणा इति। तत्राद्यायाः कीर्तेरुदाहरणम्। समानसीमेरुसखः पितॄणां कन्यां कुलस्य
स्थितये स्थितज्ञः। मेनां मुनीनामपि माननीयामात्मानुरूपां विधिनोपयेमे। एवं वा एकपादेऽपि स्वयमुदा
हरणीयम्। अनंतरोदीरितेति लक्षणाक्रांतत्वादुक्ता एव न च स्युपजातिः। एकत्र पादे इति तु रामाख्याद्वा
दशी नजेति। नगणजगणाभ्यां सहितैर्जगणलघुगुरुभिः सुमुखी नाम। दोधकमिति। भगणत्रय
गुरुद्वयेन दोधकं नाम। अत्र भभभादिति समाहारद्वंद्वः इति भट्टाः वस्तुतस्तु द्वंद्वविधेरनेकसुबंत
विषयत्वादत्र चांतरंगे कृष्णे प्रसंगेन तदाभावप्रसंगः कथमन्यथाकरावित्यादौ न द्वंद्वः तस्माद्भात्त १५
रोभो भभस्तादुत्तरो भो भभ [illegible] शालिनीति। मगणात्तगणद्वयेन गुरुद्वयेन च

मगण रगण

वातोर्मीति। मगणभगणतगणैर्गुरुद्वयेन शालिन्येव वातोर्मीति ज्ञेया। भ्रमेति। मभनलघु गुरुभिर्भ्रमरविलसितं नाम। रादिति रगणात्परं नगणैर्लघुगुरुभ्यां स्वागतानाम। स्वागतेति। रगणनगणभगणैर्गुरुद्वयेन स्वागतानाम। ननेति। नगणद्वयेन मगणेन गुरुद्वये न च वृत्तानाम यतिः शालिनीवत्। ननरेति। नगणाभ्यां रगणलघुगुरुभिश्च भद्रिकानाम श्येनिकेति। रगणजगणरगणलघुगुरुभिः श्येनिकानाम। मौक्तिकेति। भतनगणैर्गुरुद्वयेन श्रीनाम पंचभिः षड्भिश्च यतिः ॥ मौक्तिकमालानाम पंचसु षट्सु च यतिः संप्रदा

वातोर्मीयं कथिता म्भौ तगौ गः। म्भौ न्लौ गः स्याद्भ्रमरविलसितम्। स्वागतेति रनभाद्गुरुयुग्मम्। ननसगगुरुरचिता वृत्ता। ननरलगुरुभिश्च भद्रिका। श्येनिका रजौ रलौ गुरुः। मौक्तिकमाला यदि भतनाद्गौ। उपस्थितमिदं ज्सौ ताद्गकारौ। पंचरसैः श्री भतनगा गौ। स्यात् जगती। चंद्रवर्त्मनिगदंति रनभसैः। जतौ तु वंशस्थमुदीरितं जरौ। स्यादिंद्रवंशा ततजैः रसंयुतैः। इह तोटकमंबुधिसैः प्रथितं। द्रुतविलंबितमाह नभौ भरौ। वसुयुगविरतिर्नौ म्यौ पुटोऽयम्। प्रमुदितवदना भवेन्नौ च रौ॥ उपस्थितमिति जसतगणैर्गुरुद्वयेन चोपस्थितं नाम। पंचेति भतनगणैर्गुरुद्वये श्रीनाम पंचभिः षड्भिश्च यतिः। जगत्यां द्वादशाक्षरपादा। चंद्रेति। रनभसगणैश्चंद्रवर्त्मनाम चतुर्भिरष्टभिश्च यतिः। जतेति। जतजरगणैर्वंशस्थं नाम स्यादिति तगणद्वयेन जरगणाभ्यां चेंद्रवंशा नाम। इहेति। इह अंबुधिसैः सगणैस्तोटकं प्रथितं तत्र पदलोपी समासः। त

नाम। द्रुतेति। नभभरगणैर्द्रुतविलंबितं नाम। वसुयुगेति नगणद्वयेन मगणयगणाभ्यां च पुटो नाम। अथ भिश्र

२

५ नजजरगैः २ औरु

मालतीनाम प्रभावद्यतिरितिवृत्तः । नयुगेति नगणयुगेन रगणयुगेन च युक्ता गौरीनाम । अभिनवेति । नजजरगणैः
भिश्च यतिः । महास्रग्विणीश्वरेति पाठं धृत्वा सप्तभिः पंचभिश्च यतिरित्याहुः तच्चिन्त्यं पुटो नौ म्यौ वसु
समुद्रा इत्यनेन विरोधात् । प्रमुदितेति नगणाभ्यां रगणाभ्यां च प्रमुदितवदना नाम ॥ नयेति नय
नयगणैः कुसुमविचित्रा नाम । रसैरिति जसजगलोन्नरो जसगणौ पवसाजलौ द्रुतगतिः रसाश्चैस्यैक
शेषैः षड्भिः यतिः । भुजंगेति चतुर्भिर्यगणैर्भुजंगप्रयातं नाम । रैरिति । चतुर्भी रगणैः स्रग्विणी नाम
भवीति नभजगरैः प्रियंवदा नाम । त्याविति । तयतयगणैर्मणिमाला नाम गुहः स्वामिकार्त्तिकेयः
मेनाकोद्गिरिर्भगुहः इत्यमरः । तस्य वक्त्रैः षड्भिर्यतिरित्यर्थः । धीरैरिति नभजरैर्ललिता नाम । प्रमिते
ति । यद्वा सजौ सगणद्वयं च सा प्रमिताक्षरा नाम । ननेति ननभरगणैरुज्ज्वला नाम सहिताश्रेणी ।
नयसहितौ न्यौ कुसुमविचित्रा रसैर्जसजसाजलौ द्रुतगतिः भुजंगप्रयातं भवेद्यश्चतुर्भिः । रैः स्रग्विणी
ता स्रग्विणी संमता । भुवि भवेन्नभजरैः प्रियंवदा त्यौ त्यौ मणिमाला छिन्ना गुहवक्त्रैः । धीरैरभाणि ल
लिता तभौ जरौ । प्रमिताक्षरा सजससैरुदिता । ननभरसहिता महितोज्ज्वला पंचाश्वैश्छिन्ना वैश्वदेवी
ममौ यौ । अश्वच्छेदोऽभिर्जलधरमाला म्भौ स्मौ । स्युर्वनमालिका नजभयैः स्यात् स्वरशरविरतिर्न्नौ
ररौ प्रभा भवति नजावथ मालती जरौ । नयुगरयुगयुता गौरी मता । अभिनवतामरसं नजाद्यः
चतुर्निभौ सान्त्ययुता ललना । ललितमभिहितं नौ म्लौ नामतः । द्रुतपदं नभजयैः कलितं स्यात् ॥
पंचेति । मगणद्वयेन यगणद्वयेन च वैश्वदेवी नाम पंचभिः सप्तभिश्च यतिः समावित्यभिधानं ममौ याविति पाठः श्रे
यान् एवमग्रेऽप्यूह्यम् अश्वीति । ममसमगणैर्जलधरमाला नाम चतुर्भिरष्टभिश्च यतिः इहेति नजभय
